योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०१९

अज्ञातलेखकः

श्रीदेव्युवाच ।

वित्तवेषवयःकर्मविद्याविभवचेष्टितैः ।

वसिष्ठस्यैव सदृशो नतु वासिष्ठचेष्टितः ।। १

वसिष्ठ इति नाम्नासौ तस्याभूदिन्दुसुन्दरी ।

नाम्ना त्वरुन्धती भार्या भूमिव्योमन्यरुन्धती ।। २

वित्तवेषवयःकर्मविद्याविभवचेष्टितैः ।

समैव साप्यरुन्धत्या नतु चेतनसत्तया ।। ३

अकृत्रिमप्रेमरसा विलासालसगामिनी ।

सास्य संसारसर्वस्वमासीत्कुमुदहासिनी ।। ४

स विप्रस्तस्य शैलस्य सानौ सरलशाद्वले ।

कदाचिदुपविष्टः सन्ददर्शाधो महीपतिम् ।। ५

समग्रपरिवारेण यान्तमाखेटकेच्छया ।

महता सैन्यघोषेण मेरोरिव बिभित्सया ।। ६

चामरैः कीर्णचन्द्रांशुपताकाभिर्लतावनम् ।

कुर्वाणं खं सितच्छत्रमण्डलै रूप्यकुट्टिमम् ।। ७

अश्वपादूस्वनत्क्ष्माजरेणुपूरावृताम्बरम् ।

हास्तिकोत्तम्भितकरवाताट्टालकगोपितम् ।। ८

महाकलकलावर्तद्रवद्दिग्भूतमण्डलम् ।

कचत्काञ्चनमाणिक्यहारकेयूरमण्डलम् ।। ९

तमालोक्य महीपालमिदं चिन्तितवानसौ ।

अहो नु रम्या नृपता सर्वसौभाग्यभासिता ।। १०
पदातिरथहस्त्यश्वपताकाच्छत्रचामरैः ।
कदा स्यां दशदिक्कुञ्जपूरकोऽहं महीपतिः ।। ११
कदा मे वायवः कुन्दमकरन्दसुगन्धयः ।
पास्यन्त्यन्तःपुरस्त्रीणां सुरतश्रमसीकरान् ।। १२
कर्पूरेण पुरन्ध्रीणां पूर्णेन यशसा दिशाम् ।
इन्दूदयावदातानि कदा कुर्यां मुखान्यहम् ।। १३
इत्थं ततःप्रभृत्येष विप्रः संकल्पवानभूत् ।
स्वधर्मनिरतो नित्यं यावज्जीवमतन्द्रितः ।। १४
हिमाशनिरिवाम्भोजं जर्जरीकर्तुमादृता ।
जले जर्जरितेवाथ जरा द्विजमुपाययौ ।। १५
आसन्नमरणस्याथ भार्या म्लानिमुपाययौ ।
तस्य शाम्यति पुष्पर्तौ लतेव ग्रीष्मभीतितः ।। १६
मामथाराधितवती सा ततस्त्वमिवाङ्गना ।
अमरत्वं सुदुष्प्रापं बुद्ध्वेमं सावृणोद्वरम् ।। १७
देवि स्वमण्डपादेव जीवो भर्तुर्मृतस्य मे ।
मायासीदित्यतस्तस्याः स एवाङ्गीकृतो मया ।। १८
अथ कालवशाद्विप्रः स पञ्चत्वमुपाययौ ।
तस्मिन्नेव गृहाकाशे जीवाकाशतया स्थितः ।। १९
संपन्नः प्राक्तनानल्पसंकल्पवशतः स्वयम् ।
आकाशवपुरेवैष पतिः परमशक्तिमान् ।। २०
प्रभावजितभूपीठः प्रतापाक्रान्तविष्टपः ।
कृपापालितपातालस्त्रिलोकविजयी नृपः ।। २१
कल्पाग्निरिरिवृक्षाणां स्त्रीणां मकरकेतनः ।
मेरुर्विषयवायूनां साध्वब्जानां दिवाकरः ।। २२
आदर्शः सर्वशास्त्राणामर्थिनां कल्पपादपः ।

पादपीठं द्विजाग्र्याणां राकाधर्मामृतत्विषः ।। २३

स्वगृहाभ्यन्तराकाशे चित्ताकाशमयात्मनि ।

तस्मिन्द्विजे शवीभूते भूताकाशशरीरिणि ।। २४

सा तस्य ब्राह्मणी भार्या शोकेनात्यन्तकर्शिता ।

शुष्केव माषशिम्बीका हृदयेन द्विधाभवत् ।। २५

भर्त्रा सह शवीभूता देहमुत्सृज्य दूरतः ।

आतिवाहिकदेहेन भर्तारं समुपाययौ ।। २६

नदीनिखातमिव तं भर्तारमनुसृत्य सा ।

आजगाम विशोकत्वं सा वासन्तीव मञ्जरी ।। २७

तत्रास्य विप्रस्य गृहाणि सन्ति भूस्थावरादीनि धनानि सन्ति ।

अद्याष्टमं वासरमाप्तमृत्योर्जीवो गिरिग्रामककन्दरस्थः ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० ब्राह्मणमरणं नामैकोनविंशः सर्गः ।। १९ ।।